संस्कृतवार्ता:
19.03.2025
प्रात: - 06:55

नासा-प्रत्यागमनम्

अन्तरिक्षयात्रिणौ सुनीताविलियम्स-बुच-विल्मोर-इत्येतौ अद्य प्रात: काले स्पेसएक्स्-क्रू-ड्रैगन-इत्यनेन अन्तरिक्षयानेन भूमावतरितवन्तौ। ताभ्यां स्पेस्-एक्स् कैप्सुल-इत्यनेन वायुच्छत्रेण मेक्सिकोदेशस्य खात्यां प्रविष्टम्। अनेन सहैव उभयो: अन्तरिक्षयात्रिणो: नवमासानां कठिना परीक्षा सम्पन्ना। अपि च अन्तरिक्षयात्रिण: नासा-संस्थाया: निक्-हेग-इत्येतेन सह रशियादेशस्य अन्तरिक्ष-यात्रिणा अलेक्सान्द्र-गोरबुनोव इत्यमुना सह स्पेसएक्स्-इत्येतस्य अन्तरिक्ष-यानस्य एकेन नियमितेन अन्ताराष्ट्रियान्तरिक्ष-स्थानके आस्ताम् एतौ अन्तरिक्ष-यात्रिणौ तत्र अष्टाशीत्यधिक-द्विशतं दिनानि व्यतीतवन्तौ। अत्रान्तरे प्रधानमन्त्री नरेन्द्रमोदी नासासंस्थाया: अन्तरिक्षयात्रिणे सुनीताविलियम्स-इत्येतस्यै सुरक्षितप्रत्यागमनाय शुभकामना: प्रदत्तवान्। स्वकीये पत्रे प्रधानमन्त्री सुश्रीविलियम्स-इत्यस्यै भारतागमनस्य निमन्त्रणमपि प्रदत्तवान्।

रायसीनासंवाद:

विदेशमन्त्री डॉ. एस्. जयशङ्कर: ह्य: ब्रिटेनदेशीयेन राष्ट्रियसुरक्षा- परामर्शदेन जोनाथन-पॉवेल इत्यमुना सह संवादं साधितवान्। अथ च असौ द्विपक्षीय-क्षेत्रगत-वैश्विक-सुरक्षा-प्रसङ्गेषु विचाराणाम् आदानप्रदानमपि कृतवान्। जयशङ्करेण नेपाल-थाइलैण्ड-लक्जमबर्ग-लातविया-मालदीव-देशान् समेत्य विभिन्न-देशानां स्वकीयै: समकक्षै: सह द्विपक्षीयोपवेशनं समनुष्ठितम्। एतदतिरिच्य डॉ. जयशङ्कर अन्ताराष्ट्रिय-परमाणूर्जाभिकरणस्य महानिदेशकेन राफेल-मारियानो-ग्रॉसी-इत्येतेन सहापि मेलनं कृतवान्। भू-राजनीति-भू-अर्थशास्त्रयो: त्रिदिवसात्मकं भारतस्य प्रमुखसम्मेलनम् रायसीनासंवाद इतीदं सोमवासरे राष्ट्रियराजधान्यां समारब्धम् यत्र इयं चर्चा सञ्जाता।

पाकिस्तानदेश:

विदेशमन्त्रालयेन विज्ञापितं यत् पाकिस्तानदेशद्वारा सीमापारातङ्कवादस्य सक्रियतया संवर्धनं पोषणञ्च जम्मूकश्मीरराज्ये शान्तये स्थिरतायै च बाधा वर्तते। वार्ताहराणां पाकिस्तानं समाश्रित्य प्रश्नानां प्रत्युत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जैसवाल: कथितवान् यत् मिथ्याप्रचारम् अतिरिच्य पाकिस्तानदेशेन अवैधरीत्याधिगतं भारतीयक्षेत्रं रिक्तव्यम्।

पोलैण्डदेश:

पोलैण्डदेशस्य उपविदेशमन्त्री व्लादिस्लाव-टेओफिल-बार्टोशेव्सकी इत्येष: उक्तवान् यत् प्रधानमन्त्री नरेन्द्रमोदी रशियादेशस्य राष्ट्रपतिं व्लादिमीर-पुतिन-इत्येनं वर्तमानसमये रशिया-यूक्रेनयो: द्वन्द्वे सामरिक-परमाणुशस्त्राणां प्रयोगं न कर्तुं प्रेरयितुं च महत्वपूर्णां भूमिकां निभालितवान्। वार्ताहरान् संसूचयन् श्री-बार्टोशेव्सकी इत्यसौ प्रधानमन्त्रिण: श्रीमोदिन: प्रत्यत्नान् अङ्गीकृतवान् अपि च वैश्विकशान्तौ भारतस्य मध्यस्थगतभूमिकां प्रकाशितवान्।

निर्वाचनायोग:

निर्वाचनायोगेन प्रतिपादितं यत् शीघ्रमेव मतदातृ-परिचय-पत्रस्य संयोजनम् आधारप्रपत्रेण सह भविष्यति। एतदर्थं परामर्शप्रक्रियापि शीघ्रमेव समारप्स्यते। परामर्शोपवेशनमिदं यू.आई.डी.ए.आई इत्येतस्य निर्वाचनायोगस्य च विशेषज्ञानां मध्ये भविष्यति। अयं निर्णय: मुख्यनिर्वाचनायुक्तेन ज्ञानेशकुमारेण गृहमन्त्रालयेन विधायिविभागस्य सचिवै: यू.आई.डी.ए.आई.(UIDAI) इत्येतस्य च मुख्यकार्यकारि अधिकारिणा सह निर्णीत:।

कबड्डी-प्रतिस्पर्धा

भारतीयमहिलादलेन ह्य: पञ्जाबराज्यस्य संगरूर-जनपदस्य मूनकक्षेत्रे वीरगतिप्राप्तोधम-सिंह-क्रीडाङ्गणे डॉ. बी.आर. अम्बेडकरस्य षष्ठमस्य विश्वचषक-कबड्डी-प्रतिस्पर्धाया मेक्सिकोदलं पराजित्य उपान्त्यचक्रे प्रविष्टम्।

।। इति वार्ता:।।